।।प्रथमः समाधिपादः।।

यः+त्यक्त्वा रूपम्-आद्यं प्रभवति जगतः+अनेकधा+अनुग्रहाय प्रक्षीण-क्लेश-राशिः विषम-विषधरः अनेक-वक्त्रः सुभोगी ।
सर्व-ज्ञान-प्रसूतिः भुजगपरिकरः प्रीतये यस्य अथ+इति अयम्-अधिकारार्थः। नित्यं देवः अहीशः सः वोऽव्यात् सित-विमल-तनुः योगदः योग-युक्तः ॥१॥

अथ योग-अनुशासनम् ॥१॥

अथ+इति+अयम्-अधिकारार्थः। योग-अनुशासनं शास्त्रम्-अधिकृतं वेदितव्यम्। योगः समाधिः। सः+च सार्वभौमः+चित्तस्य धर्मः। क्षिप्तं मूढं विक्षिप्तम्-एकाग्रं निरुद्धमिति चित्तभूमयः। तत्र विक्षिप्ते चेतसि विक्षेप+उपसर्जनीभूतः समाधिः+न योगपक्षे वर्तते। यः+तु+एकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबन्धनानि श्लथयति निरोधम् अभिमुखं करोति स संप्रज्ञातो योगः+इति+आख्यायते। स च वितर्कानुगतो विचारानुगत आनन्दानुगतः+अस्मितानुगत इति उपरिष्टात् निवेदयिष्यामः। सर्ववृत्तिनिरोधे तु+असंप्रज्ञातः समाधिः॥१॥ तस्य लक्षण+अभिधित्सय+इदं सूत्रं प्रववृते—

योगः+चित्त-वृत्ति-निरोधः ॥२॥

सर्वशब्दाग्रहणात् संप्रज्ञातः+अपि योग+इत्याख्यायते। चित्तं हि प्रख्या-प्रवृत्ति-स्थिति-शीलत्वात् त्रिगुणम्। प्रख्यारूपं हि चित्तसत्त्वं रजः+तमोभ्यां संसृष्टम् ऐश्वर्यविषयप्रियं भवति। तदेव तमसानुविद्धम्+अधर्म+अज्ञान+अवैराग्य+अनैश्वर्य+उपगं भवति। तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्य+एश्वर्य+उपगं भवति।तदेव रजः+लेशमलापेतं स्वरूपप्रतिष्ठं सत्त्वपुरुष+अन्यताख्यातिमात्रं धर्ममेघध्यान+उपगं भवति। तत् परं प्रसंख्यानम्+इति+आचक्षते ध्यायिनः। चितिशक्तिः+अपरिणामिनि+अप्रतिसङ्क्रमा दर्शितविषया शुद्धा च+अनन्ता च सत्त्वगुणात्मिका च+इयम्+अतः विपरीता

विवेकख्यातिः+इति। अतः+तस्यां विरक्तं चित्तं ताम्+अपि ख्यातिं निरुणद्धि। तत्+अवस्थं संस्कार+उपगं भवति। स निर्बीजः समाधिः। न तत्र किंचित् संप्रज्ञायत इति+असम्प्रज्ञातः। द्विविधः स योगः+चित्तवृत्तिनिरोध+इति।
तत्+अवस्थे चेतसि विषय+अभावात्+बुद्धिबोधात्मा पुरुषः किंस्वभावः ? इति—

तदा द्रष्टुः स्वरूपे+अवस्थानम् ॥३॥

स्वरूपप्रतिष्ठा तदानीं चिति-शक्तिः+यथा कैवल्ये । व्युत्थानचित्ते तु सति तथापि भवन्ती न तथा ॥३॥ कथं तर्हि? दर्शित-विषयत्वात्—

वृत्ति-सारूप्यम्+इतरत्र ॥४॥

व्युत्थाने याः+चित्त-वृत्तयः+तत्+अवशिष्ट-वृत्तिः पुरुषः । तथा च सूत्रं—एकमेव दर्शनं, ख्यातिः+एव दर्शनमिति । चित्तम्+अयस्कान्त-मणिकल्पं सन्निधि-मात्र+उपकारि दृश्यत्वेन स्वं भवति पुरुषस्य स्वामिनः । तस्मात्त्+चित्त-वृत्ति-बोधे पुरुषस्य+अनादिः सम्बन्धः+ हेतुः ॥४॥
ताः पुनः+निरोद्धव्या बहुत्वे सति चित्तस्य—

वृत्तयः पञ्चतय्यः क्लिष्टाः+ अक्लिष्टाः ॥५॥
क्लेशहेतुकाः कर्माशय-प्रचय-क्षेत्रीभूताः क्लिष्टाः । ख्याति-विषया गुणाधिकार-विरोधिन्यः+अक्लिष्टाः । क्लिष्ट-प्रवाहपतिता अपि+अक्लिष्टाः । क्लिष्टः+छिद्रेषु+अपिक्लिष्टा भवन्ति । अक्लिष्टः+छिद्रेषु क्लिष्टा इति । तथाजातीयकाः संस्कारा वृत्तिभिः+एव क्रियते, संस्कारैः+च+एव वृत्तय इति । एवं वृत्तिसंस्कारचक्रम्+अनिशमावर्तते । तत्+एवंभूतं चित्तम्-अवसिताधिकारम्-आत्मकल्पेन व्यवतिष्ठते प्रलयं वा गच्छतीति । ताः क्लिष्टाः+च+अक्लिष्टाः+च पञ्चधा वृत्तयः ॥५॥

प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः ॥६॥

प्रत्यक्ष-अनुमान-अगमाः प्रमाणानि ॥७॥

इन्द्रिय-प्रणालिकया चित्तस्य बाह्य-वस्तु+उपरागात्+तत्+विषया सामान्य-विशेष-आत्मनः+अर्थस्य विशेष-अवधारण-प्रधाना वृत्तिः प्रत्यक्षं प्रमाणम् । फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः । बुद्धेः प्रतिसंवेदी पुरुषः+ इति+उपरिष्टात्-उपपादयिष्यामः । अनुमेयस्य तुल्यजातीयेषु+अनुवृत्तो भिन्नजातीयेभ्यो व्यावृत्तः सम्बन्धः+ यः+तत्+विषया सामान्यावधारणप्रधाना वृत्तिः+अनुमानम् । यथा देशान्तरप्राप्तेः+गतिमत्+चन्द्रतारकं चैत्रवत्, विन्ध्यः+च+अप्राप्तिः+अगतिः । आप्तेन दृष्टः+अनिम्तः+ वा+अर्थः परत्र स्वबोधसङ्क्रान्तये शब्देन+उपदिश्यते । शब्दात्+तत्+अर्थविषया वृत्तिः श्रोतुः+आगमः । यस्य+अश्रद्धेयार्थः+ वक्ता न दृष्ट-अनुमितार्थः स आगमः प्लवते । मूलवक्तरि तु दृष्ट-अनुमितार्थे निर्विप्लवः स्यात॥७॥

विपर्ययः+ मिथ्याज्ञान्+अतद्-रूप-प्रतिष्ठम् ॥८॥

स कस्मात्+न प्रमाणं ? यतः प्रमाणेन बोध्यते, भूतार्थ-विषयत्वात्+प्रमाणस्य । तत्र प्रमाणेन बाधनमप्रमाणस्य दृष्टम् । तद्यथा द्विचन्द्रदर्शनं सद्विषयेण-एकचन्द्रदर्शनेन बाध्यत इति । स-अयं पञ्चपर्वा भवति+अविद्या, अविद्या+अस्मिता-राग-द्वेष+अभिनिवेशाः क्लेशा इति । एत एव स्वसंज्ञाभिः+तमः+ मोहः+ महामोहः+तमिस्रः+अन्धतामिस्रः+इति । एते चित्त-मल-प्रसङ्गेन+अभिधास्यन्ते ॥८॥

शब्द-ज्ञान-अनुपाती वस्तु-शून्यः+ विकल्पः ॥९॥

सः+ न प्रमाण-उपारोही, न विपर्यय-उपारोही च । वस्तुशून्यत्वे+अपि शब्द-ज्ञान-माहात्म्यनिबन्धनो व्यवहारः+ दृश्यते, तत्+यथा चैतन्यं पुरुषस्य स्वरूपम्+इति। यदा चितिः+एव पुरुषः+तदा किमत्र केन व्यपदिश्यते ? भवति च व्यपदेशे वृत्तिः, यथा चैत्रस्य गौः+इति । तथा प्रतिषिद्ध-वस्तुधर्मा निष्क्रियः पुरुषः, तिष्ठति बाणः, स्थास्यति, स्थितः+ इति गतिनिवृत्तौ धात्वर्थमात्रं गम्यते । तथा+अनुत्पत्ति-धर्मा पुरुषः+ इति उत्पत्तिधर्मस्य+अभावमात्रम्+अवगम्यते, न पुरुषान्वयी धर्मः । तस्मात्+विकल्पितः स धर्मः+तेन च+अस्ति व्यवहारः+ इति ॥९॥

अभाव-प्रत्यय-आलम्बना वृत्तिः+निद्रा ॥१०॥

सा च सम्प्रबोधे प्रत्यवमर्शात्+प्रत्ययविशेषः । कथं ? सुखम्-अहम्-अस्वाप्सम्, प्रसन्नं मे मनः प्रज्ञां मे विशारदीकरोति । दुःखम्-अहम्-अस्वाप्सम्, स्त्यानं मे मनः+ भ्रमति+अनवस्थितम् । गाढं मूढः+अहम्-अस्वाप्सम् । गुरूणि मे गात्राणि, क्लान्तं मे चित्तम् । अलसं मुषितम्+इव तिष्ठति+इति । सः+ खलु+अयं प्रबुद्धस्य प्रत्यवमर्शो न स्यात्+असति प्रत्यय-अनुभवे । तत्+आश्रिताः स्मृतयः+च तत्+विषया न स्युः । तस्मात् प्रत्ययविशेषः+ निद्रा । सा च समाधौ+इतर-प्रत्ययवत्+निरोद्धव्यः+इति ॥१०॥

अनुभूत-विषय+असंप्रमोषः स्मृतिः ॥११॥

किं प्रत्ययस्य चित्तं स्मरति+इति+आहोस्विद्+विषयस्य इति ? ग्राह्य-उपरक्तः प्रत्ययः+ ग्राह्य-ग्रहण+उभयाकारनिर्भासः+तथा-जातीयकं संस्कारमारभते । स संस्कारः स्वव्यञ्जक-अञ्जनतदाकाराम्-एव ग्राह्य-ग्रहण+उभय-आत्मिकां स्मृतिं जनयति । तत्र ग्रहणाकारपूर्वा बुद्धिः, ग्राह्याकारपूर्वा स्मृतिः । सा च द्वयी—भावित-स्मर्तव्या च+अभावित-स्मर्तव्या च । स्वप्ने भावित-स्मर्तव्या, जाग्रत्समये तु+अभावितस्मर्तव्य+इति । सर्वाः+च+एताः स्मृतयः प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतीनाम्-अनुभवात्+प्रभवन्ति । सर्वाः+च+एता+ वृत्तयः सुख-दुःख-मोहात्मिकाः । सुख-दुःखमोहाः+च क्लेशेषु व्याख्येयाः । सुख-अनुशयी रागः, दुःख-अनुशयी द्वेषः, मोहः, पुनः+अविद्य+इति । एताः सर्वाः वृत्तयो निरोद्धव्याः । आसां निरोधे सम्प्रज्ञातः+ वा समाधिः+भवति+असम्प्रज्ञातः+ वा ॥११॥

अभ्यास-वैराग्याभ्यां तत्+निरोधः ॥१२॥

चित्तनदी नाम+उभयतः+ वाहिनी । वहति कल्याणाय वहति पापाय च । या तु कैवल्य-प्राग्भारा विवेक-विषयनिम्ना सा कल्याणवहा, संसार-प्राग्भारा-विवेक-विषयनिम्ना पापवहा । तत्र वैराग्येण विषयस्रोतः खिलीक्रियते, विवेक-दर्शन+अभ्यासेन विवेकस्रोतः+ उद्घाट्यत इति+उभयाधीनः+चित्त-वृत्ति-निरोधः ॥१२॥

तत्र स्थितौ यत्नः+अभ्यासः ॥१३॥

चित्तस्य+अवृत्तिकस्य प्रशान्तवाहिना स्थितिः, तदर्थः प्रयन्तः+ वीर्यमुत्साहः । तत्+सम्पिपादयिषया तत्+साधन+अनुष्ठानम्+अभ्यासः ॥१३॥

स तु दीर्घ-काल-नैरन्तर्य-सत्कार-आसेवितः+ दृढभूमिः ॥१४॥

दीर्घ-काल-सेवितः+ निरन्तर-सेवितः सत्कार-आसेवितः । तपसा ब्रह्मचर्येण विद्यया श्रद्धया च सम्पादितः सत्कारवान्-दृढभूमिः+भवति । व्युत्थान-संस्कारेण द्राक्+इति+एव-अनभिभूत-विषय इति+अर्थः ॥१४॥

दृष्ट-अनुश्रविक-विषय-वितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥१५॥

स्त्रियः+अन्नं पानम्+एश्वर्यम्+इति दृष्ट-विषये वितृष्णस्य स्वर्गैः+ वैदेह्य-प्रकृतिलयत्व-प्राप्तौ+अनुश्रविकविषये वितृष्णस्य, दिव्य+अदिव्य-विषय-सम्प्रयोगे+अपि चित्तस्य विषय-दोष-दर्शिनः प्रसङ्ख्यान-बलाद् अनाभोगात्मिका हेय-उपादेय-शून्या वशीकार-संज्ञा वैराग्यम् ॥१५॥

तत्+परं पुरुष-ख्यातेः+गुण-वैतृष्ण्यम् ॥१६॥

दृष्ट+अनुश्रविक-विषय-दोष-दर्शी विरक्तः पुरुष-दर्शन+अभ्यासात्+ तच्छुद्धि-प्रविवेक-अपि-अयित-बुद्धिः+गुणेभ्यो व्यक्त+अव्यक्त-धर्मकेभ्यः+ विरक्तः+इति। तत्+द्वयं वैराग्यम् । तत्र यद्-उत्तरं तत्+ज्ञानप्रसादमात्रं, यस्य+उदये प्रत्युदितख्यातिः+एवं मन्यते—प्राप्तं प्रापनीयं, क्षीणाः क्षेतव्याः क्लेशाः । छिन्नः श्लिष्ट-पर्वा भवसङ्क्रमः, यस्य+अविच्छेदात्+जनित्वा म्रियते । मृत्वा च जायत इति । ज्ञानस्य+एव पराकाष्ठा वैराग्यम् । एतस्य+एव हि नान्तरीयकं कैवल्यम्-इति ॥१६॥
अथ+उपायद्वयेन निरुद्ध-चित्त-वृत्तेः कथम्-उच्यते सम्प्रज्ञातः समाधिः+इति—

वितर्क-विचार+आनन्द+अस्मिता-रूपानुगमात् सम्प्रज्ञातः ॥१७॥

वितर्कः+चित्तस्य+आलम्बने स्थूल आभोगः। सूक्ष्मः+ विचारः। आनन्दः+ ह्लादः। एकात्मिका संविद् अस्मिता । तत्र प्रथमः+चतुष्टिः+अनुगतः समाधिः सवितर्कः ।

द्वितीयः+ वितर्क-विकलः सविचारः । तृतीयः+ विचार-विकलः सानन्दः । चतुर्थः+तत्+ विकलः+अस्मितामात्र इति । सर्व एते सालम्बनाः समाधयः ॥१७॥
असम्प्रज्ञातः समाधिः किम्-उपायः किं-स्वभावः+ वेति—

विराम-प्रत्यय+अभ्यास-पूर्वः संस्कार-शेषः+अन्यः ॥१८॥

सर्व-वृत्ति-प्रत्ययः+तमये संस्कार-शेषः+ निरोधः+चित्तस्य समाधिः+असम्प्रज्ञातः । तस्य परं वैराग्यम्-उपायः । सालम्बनः+ हि+अभ्यासः+तत्+साधनाय न कल्पत इति विराम-प्रत्ययः+ निर्वस्तुक आलम्बनीक्रियते । स च+अर्थ-शून्यः । तत्+अभ्यास-पूर्व-चित्तं निरालम्बनम्+अभाव-प्राप्तम्+इव भवति+इति+एषः+ निर्बीजः समाधिः+असम्प्रज्ञातः ॥१८॥
स खल्वयं द्वि-विधः—उपाय-प्रत्ययः+ भव-प्रत्ययः+च । तत्र+उपाय-प्रत्ययः योगिनां भवति ।
भव-प्रत्ययः+ विदेह-प्रकृति-लयानाम् ॥१९॥

विदेहानां देवानां भवप्रत्ययः । ते हि स्व-संस्कारमात्र+उपयोगेन चित्तेन कैवल्यपदम्+इव+अनुभवन्तः स्वसंस्कार-विपाकं तथा-जातीयकम्+इति वाहयन्ति । तथा प्रकृतिलयाः साधिकारे चेतसि प्रकृतिलीने कैवल्य-पदम्+इव+अनुभवन्ति, यावत्+न पुनः+आवर्तते+अधिकार-वशात्+चित्तम्+इति ॥१९॥

श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञा-पूर्वकः+ इतरेषाम् ॥२०॥

उपाय-प्रत्ययः+ योगिनां भवति । श्रद्धा चेतसः सम्प्रसादः । सा हि जननी+इव कल्याणी योगिनं पाति । तस्य हि श्रद्दधानस्य विवेकार्थिनः+ वीर्यम्+उपजायते । समुपजात-वीर्यस्य स्मृतिः+उपतिष्ठते । स्मृति+उपस्थाने अ चित्तमनाकुलं समाधीयते । समाहित-चित्तस्य प्रज्ञाविवेक उपावर्तते । येन यथावद्+वस्तु जानन्ति । तत्+अभ्यासात्+तत्+विषयात्+च वैराग्यात् +असम्प्रज्ञातः समाधिः+भवति ॥२०॥
ते खलु नव योगिनः+ मृदु-मध्य+अधिमात्र+उपायः+ भवन्ति, तत्+यथा—मृदु+उपायः+

मध्यः+उपायः+अधिमात्रः+उपायः इति । तत्र मृदु+उपायः+त्रिविधः—मृदु-संवेगः+ मध्य-संवेगः+तीव्र-संवेगः इति । तथा मध्यः+उपायः+तथा+अधिमात्रः+उपायः इति । तत्र+अधिमात्रः+उपायानां—

तीव्र-संवेगानाम्+आसन्नः ॥२१॥

समाधि-लाभः समाधि-फलं च भवति+इति ॥२१॥
मृदु-मध्य-अधिमात्रत्वात्+ततः+अपि विशेषः ॥२२॥

मृदु-तीव्रः+ मध्य-तीव्रः+अधिमात्र-तीव्रः+ इति । ततः+अपि विशेषः, तत्+ विशेषात्+ मृदु-तीव्र-संवेगस्य+आसन्नः, ततः मध्य-तीव्र-संवेगस्य+आसन्नतरः, तस्मात्+अधिमात्र-तीव्र-संवेगस्य+अधिमात्रः+उपायस्य+अपि+आसन्नतमः समाधि-लाभः समाधि-फलं च+इति ॥२२॥
किम्+एतस्मात्+एव+आसन्नतमः समाधिः+भवति, अथास्य लाभे भवति+अन्यः+अपि कः+चित्+उपायः, न वा+इति ?

ईश्वर-प्रणिधानात्+वा॥२३॥

प्रणिधानात्+भक्ति-विशेषात्+आवर्जितः ईश्वरः+तम्+अनुगृह्णाति+अभिध्यान-मात्रेण। तत्+अभिध्यान-मात्रात्+अपि योगिनः आसन्नतमः समाधि-लाभः समाधि-फलं च भवति+इति ॥२३॥
अथ प्रधान-पुरुष-व्यतिरिक्तः कः+अयम्+ईश्वरः+ नाम+इति ?

क्लेश-कर्म-विपाक-आशयैः+अपरामृष्टः पुरुषविशेषः+ ईश्वरः ॥२४॥

अविद्यादयः क्लेशाः । कुशला+अकुशलानि कर्माणि । तत्+फलं विपाकः । तत्+अनुगुणा वासना आशयः । ते च मनसि वर्तमानाः पुरुषे व्यपदिश्यन्ते । सः+ हि तत्फलस्य भोक्तः+इति । यथा जयः पराजयः+ वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते । यः+ हि+ अनेन भोगेन+अपरामृष्टः सः+ पुरुष-विशेषः+ ईश्वरः । कैवल्यं प्राप्ताः+तर्हि सन्ति च

बहवः केवलिनः । ते हि त्रीणि बन्धनानि छित्त्वा कैवल्यं प्राप्ताः । ईश्वरस्य च तत्+सम्बन्धः+ न भूतो न भावी । यथा मुक्तस्य पूर्वा बन्ध-कोटिः प्रज्ञायते न+एवम्+ईश्वरस्य । यथा वा प्रकृति-लीनस्य+उत्तरा बन्ध-कोटिः सम्भाव्यते, न+एवम्+ईश्वरस्य । सः+ तु सदा+एव मुक्तः सदा+एव+ईश्वरः+ इति ।

यः+असौ प्रकृष्ट-सत्त्व+उपादानात्+ईश्वरस्य शाश्वतिक उत्कर्षः, सः+ किं सनिमित्त आहोस्वित्+निर्निमित्त इति ? तस्य शास्त्रं निमित्तम् । शास्त्रं पुनः किन्निमित्तं ? प्रकृष्ट-सत्त्व-निमित्तम् । एतयोः शास्त्र+उत्कर्षयोः+ईश्वरसत्त्वे वर्तमानयोः+अनादिः सम्बन्धः । एतस्मात्+एतत्+भवति सदा+एव+ईश्वरः सदा+एव मुक्त इति ।

तत्+च तस्य+ऐश्वर्यं साम्य+अतिशय-विनिर्मुक्तम्। न तावत्+ऐश्वर्य+अन्तरेण तत्+अतिशय्यते । यत्+एव+अतिशयि स्यात्+तदेव तत्+स्यात्। तस्मात्+यत्र काष्ठा-प्राप्तिः+ऐश्वर्यस्य सः+ ईश्वरः । न च तत्+समानम्+ऐश्वर्यम्+अस्ति । कस्मात्? द्वयोः+तुल्ययोः+एकस्मिन् युगपत् कामिते+अर्थे नवम्-इदम्-अस्तु पुराणम्-इदम्-अस्तु+इति+एत्कस्य सिद्धौ+इतरस्य प्राकाम्य-विधातादूनत्वं प्रसक्तम् । द्वयोः+च तुल्ययोः+युगपत्+कामितार्थ-प्राप्तिः+नास्ति । अर्थस्य विरुद्धत्वात। तस्मात्+अस्य साम्या+अतिशयै+विनिर्मुक्तम्+ऐश्वर्यं स एव+ईश्वरः । सः+ च पुरुषविशेषः+ इति ॥२४॥
किं च,

तत्र निरतिशयं सर्वज्ञ-बीजम् ॥२५॥

यत्+इदम्+अतीत+अनागत-प्रत्युत्पन्न-प्रत्येक-समुच्चय+अतीन्द्रिय-ग्रहणम्-अल्पं बहु+इति सर्वज्ञबीजम्+एतद्धि वर्धमानं यत्र निरतिशयं स सर्वज्ञः । अस्ति काष्ठा-प्राप्तिः सर्वज्ञ-बीजस्य सातिशयत्वात्+परिमाणवदिति । यत्र काष्ठा-प्राप्ति+ज्ञानस्य स सर्वज्ञः । सः+ च पुरुष-विशेषः+ इति । सामान्यमात्र+उपसंहारे च कृतः+उपक्षयम्+अनुमानं न विशेष-प्रतिपत्तौ समर्थम्+इति । यस्य संज्ञादि-विशेष-प्रतिपत्तिः+आगमतः पर्यन्वेष्या।

तस्य+आत्मा+अनुग्रह-अभावे+अपि भूत-अनुग्रहः प्रयोजनं, ज्ञानधर्म+उपदेशेन कल्प-प्रलय-महाप्रलयेषु संसारिणः पुरुषान्-उद्धरिष्यामि+इति । तथा च+उक्तं—आदिविद्वान्+निर्माणचित्तम्+अधिष्ठाय कारुण्यात् +भगवान्+परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाच इति ॥२५॥

स एषः—

सः+ पूर्वेषामपि गुरुः कालेन+अनवच्छेदात्॥२६॥

पूर्वं हि गुरवः कालेन+अवच्छिद्यन्ते । यत्र+अवच्छेदार्थेन कालः+ न+उपावर्तते, सः+ एषः+ पूर्वेषाम्+अपि गुरुः । यथा+अस्य सर्गस्य+आदौ प्रकर्षगत्या सिद्धः+तथा+अतिक्रान्त-सर्गादिषु+अपि प्रत्येतव्यः ॥२६॥

तस्य वाचकः प्रणवः ॥२७॥

वाच्य ईश्वरः प्रणवस्य । किमस्य सङ्केत-कृतं वाच्य-वाचकत्वम्+अथ प्रदीप-प्रकाशवत्+अवत्स्थितम्+इति । स्थितः+अस्य वाच्यस्य वाचकेन सह सम्बन्धः । सङ्केतः+तु+ईश्वरस्य स्थितमेव+अर्थम्+अभिनयति । यथा+अवस्थितः पिता-पुत्रयोः सम्बन्धः सङ्केतेन+अवद्योत्यते, अयमस्य पिता, अयमस्य पुत्रः+ इति । सर्ग+अन्तरेषु+अपि वाच्य-वाचक-शक्त्यपेक्षः+तथैव सङ्केतः क्रियते । सम्प्रतिपत्ति-नित्यतया नित्यः शब्दार्थ-सम्बन्धः+ इति+आगमिनः प्रतिजानते ॥२७॥

विज्ञात-वाच्य-वाचकत्वस्य योगिनः—

तत्+जपः+तत्+अर्थ-भावनम् ॥२८॥

प्रणवस्य जपः प्रणव-अभिधेयस्य च+ईश्वरस्य भावनम् । तदस्य योगिनः प्रणवं जपतः प्रणवार्थं च भावयतः+चित्तम्+एकाग्रं सम्पद्यते । तथा च+उक्तम्—

स्वाध्यायात्+योगम्-आसीत योगात्+स्वाध्यायम्+आसते।
स्वाध्याय-योग-सम्पत्त्या परमात्मा प्रकाशते ॥ इति ॥२८॥

किं च+अस्य भवति ?

ततः प्रत्यक्-चेतन+अधिगमः+अपि+अन्तराय-अभावः+च ॥२९॥

ये तावद्+अन्तरायाः+ व्याधि-प्रभृतयः+ते तावत्+ईश्वर-प्रणिधानात्+न भवन्ति । स्वरूप-दर्शनम्+अपि+अस्य भवति। यथ+एव+ईश्वरः पुरुषः शुद्धः प्रसन्नः केवलः+अनुपसर्गः+तथा+अयमपि बुद्धेः प्रतिसंवेदी पुरुष इति+एवम+अधिगच्छति ॥२९॥
अथ के+अन्तरायाः+ ये चित्तस्य विक्षेपाः ? के पुनः+ते कियन्तः+ वा+इति ?

व्याधिः+स्त्यान-संशय-प्रमाद+आलस्य+अविरति+भ्रान्ति-दर्शन+अलब्धभूमिकत्व+अनवस्थितत्वानि चित्त-विक्षेपाः+ते+अन्तरायाः ॥३०॥

नव+अन्तरायाः+चित्तस्य विक्षेपाः । सह+एते चित्तवृत्तिभिः+भवन्ति । एतेषाम्+अभावे न भवन्ति पूर्वोक्ताः+चित्त-वृत्तयः । तत्र व्याधिः+धातु+रस-करण-वैषम्यम् । स्त्यानम्+अकर्मण्यता चित्तस्य । संशय उभय-कोटि-स्पृग्विज्ञानं स्यात्+इदम्+एवं न+एवं स्यात्+इति । प्रमादः समाधि-साधनानाम्+अभावनम् । आलस्यं कायस्य चित्तस्य च गुरुत्वात्+प्रवृत्तिः । अविरतिः+चित्तस्य विषय-सम्प्रयोगात्मा गर्धः । भ्रान्ति-दर्शनं विपर्यय-ज्ञानम् । अलब्ध-भूमिकत्वं समाधि-भूमेः+अलाभः। अनवस्थितत्वं यत्+लब्धायां भूमौ चित्तस्य+अप्रतिष्ठा । समाधि-प्रतिलम्भे हि सति तदवस्थितं स्यादिति । एते चित्त-विक्षेपाः नव योग-मला योग-प्रतिपक्षा योग-अन्तरायाः+ इति+अभिधीयन्ते ॥३०॥

दुःख-दौर्मनस्य+अङ्गमेजयत्व-श्वास-प्रश्वासा विक्षेप-सहभुवः ॥३१॥

दुःखम्+आधि+आत्मिकम्+आधि-भौतिकम्+आधि-दैविकं च । येन+आभिहताः प्राणिनः+तद्+उपघाताय प्रयतन्ते, तत्+दुःखम् । दौर्मनस्यम्+इच्छा+अभिघातात्+चेतसः क्षोभः । यत्+अङ्गानि+जयति कम्पयति तत्+अङ्गमेजयत्वम् । प्राणः+ यद्+बाह्यं वायुमाचामति सः+ श्वासः । यत्+कोष्ठ्यं वायुं निःसारयति सः+ प्रश्वासः । एते विक्षेप-सहभुवः, विक्षिप्त-चित्तस्य+एते भवन्ति । समाहित-चित्तस्य+एते न भवन्ति ॥३१॥
अथ+एते विक्षेपाः समाधि-प्रतिपक्षाः+ताभ्याम्+एव+अभ्यास-वैराग्याभ्यां निरोद्धव्याः । तत्र+अभ्यासस्य विषयम्+उपसंहरन्+इदम्+आह—

तत्+प्रतिषेधार्थम्+एकतत्त्वाभ्यासः ॥३२॥

विक्षेप-प्रतिषेधार्थम्+एकतत्त्व+आवलम्बनं चित्तम्+अभ्यसेत्। यस्य तु प्रत्यर्थ-नियतं प्रत्यय-मात्रं क्षणिकं च चित्तं तस्य सर्वम्+एव चित्तम्+एकाग्रं न+अस्ति+एव विक्षिप्तम् । यदि पुनः+इदं सर्वतः प्रयाहृत्य+एकस्मिन्+अर्थे समाधीयते, तदा भवति+एकाग्रमिति+अतः+ न प्रत्यर्थ-नियतम् । यः+अपि सदृश-प्रत्यय-प्रवाहेण चित्तम्+एकाग्रं मन्यते, तस्य+एकाग्रता यदि प्रवाह-चित्तस्य धर्मः+तत्+एकं न+अस्ति प्रवाह-चित्तं क्षणिकत्वात्।

अथ प्रवाहांशस्य+एव प्रत्ययस्य धर्मः स सर्वः सदृश-प्रत्यय-प्रवाही वा विसदृश-प्रत्यय-प्रवाही वा प्रत्यर्थ-नियतत्वात्+एकाग्र एवति विक्षिप्त-चित्तानुपपत्तिः । तस्मात्+एकम्+अनेकार्थम्+अवस्थितं चित्तम्+इति । यदि च चित्तेन+एकेन+अनन्विताः स्वभाव-भिन्नाः प्रत्यया जायेरन्+अथ कथम्+अन्य-प्रत्यय-दृष्टस्य+अन्यः स्मर्ता भवेत्? अन्य-प्रत्ययोपचितस्य च कर्माशयस्यान्यः प्रत्यय उप-भोक्ता भवेत्। कथम्+चित् समाधीयमानम्+अपि+एतत्+गोमयपायसीयं न्यायमाक्षिपति । किं च, स्व-आत्मा-अनुभवापह्नवः+चित्तस्य+अन्यत्वे प्राप्नोति । कथं ? ‘यद्+अहमद्राक्षं तत्+स्पृशामि’, ‘यत्+च+अस्प्राक्षं तत्+पश्यामि’ इति+अहम्+इति प्रत्ययः सर्वस्य प्रत्ययस्य भेदे सति प्रत्ययिनि+अभेदेन+उपस्थितः । एकप्रत्ययविषयः+अयम्+अभेदात्म+अहम्+इति प्रत्ययः कथम्+अत्यन्तभिन्नेषु चित्तेषु वर्तमानं सामान्यम्+एकं प्रत्ययिनम्+आश्रयेत्? स्व+अनुभवग्राह्यः+च+अयम्+अभेदात्मा+अहमिति प्रत्ययः । न च प्रत्यक्षस्य माहात्म्यं प्रमाण-अन्तरेण+अभिभूयते । प्रमाण+अन्तरं च प्रत्यक्ष-बलेन+एव व्यवहारं लभते । तस्मात्+एकम्+अनेकार्थम्+अवस्थितं च चित्तम् ॥३२॥

यस्य चित्तस्य+अवस्थितस्य+इदं शास्त्रेण परिकर्म निर्दिश्यते तत्कथं ?

मैत्री-करुणा-मुदित+उपेक्षणां सुख-दुःखपुण्य+अपुण्य-विषयाणां भावनातः+चित्त-प्रसादनम् ॥३३॥

तत्र सर्व-प्राणिषु सुख-सम्भोग+आपन्नेषु मैत्रीं भावयेत्। दुःखितेषु करुणाम् ।

पुण्यात्मकेषु मुदिताम् । अपुण्य-शीलेषु+उपेक्षाम् । एवम्+अस्य भावयतः शुक्लः+ धर्म उपजायते । ततः+च चित्तं प्रसीदति । प्रसन्नम्+एकाग्रं स्थितिपदं लभते ॥३३॥

प्रच्छर्दन-विधारणाभ्यां वा प्राणस्य ॥३४॥

कोष्ठ्यस्य वायोः+नासिकापुटाभ्यां प्रयत्नविशेषात्+वमनं प्रच्छर्दनम् । विधारणं प्राणायामः । ताभ्यां वा मनसः स्थितिं सम्पादयेत॥३४॥

विषयवती वा प्रवृत्ति+रुत्पन्ना मनसः स्थिति-निबन्धिनी ॥३५॥

नासिकाग्रे धारयतः+अस्य या दिव्य-गन्ध-संवित् सा गन्धप्रवृत्तिः । जिह्वाग्रे रस-संवित्। तालुनि रूप-संवित्। जिह्वा-मध्ये स्पर्श-संवित्। जिह्वा-मूले शब्द-संवित्+इति+एताः प्रवृत्तयः+ उत्पन्नाः+चित्तं स्थितौ निबध्नन्ति, संशयं विधमन्ति, समाधि-प्रज्ञायां च द्वारी-भवन्ति+इति । एतेन चन्द्र+आदित्य-ग्रह-मणि-प्रदीप-रत्नादिषु प्रवृत्तिः+उत्पन्ना विषयवति+एव वेदितव्या । यदि+अपि हि तत्+शास्त्र+अनुमान+आचार्य+उपदेशैः+अवगतम्+अर्थतत्त्वं सद्भूतम्+एव भवति, एतेषां यथा भूतार्थ-प्रतिपादन-सामर्थ्यात्, तथा+अपि यावत्+एकदेशा+अपि कः+चित्+न स्वकरणसंवेद्यः+ भवति, तावत्+सर्वं परोक्षम्+इव+अपवर्गादिषु सूक्ष्मेषु+अर्थेषु न वृढां बुद्धिम्+उत्पादयति । तस्मात्+शास्त्र+अनुमान+आचार्य+उपदेशा+उपोद्बलनार्थम्+एव+अवश्यं कः+चित्+अर्थविशेषः प्रत्यक्षीकर्तव्यः । तत्र तत्+उपदिष्टार्थे+एकदेशस्य प्रत्यक्षत्वे सति सर्वं सूक्ष्मविषयम्+अपि+अपवर्गात्+सुश्रद्धीयते । एतत्+अर्थम्+एव+इदं चित्त-परिकर्म निर्दिश्यते । अनियतासु वृत्तिषु तत्+विषयायां वशीकार-संज्ञायाम्+उपजातायां चित्तं समर्थं स्यात्, तस्य तस्यार्थस्य प्रत्यक्षीकरणाय+इति । तथा च सति श्रद्धा-वीर्य-स्मृति-समाधयोः+अस्याप्रतिबन्धेन भविष्यन्ति+इति ॥३५॥

विशोका वा ज्योतिष्मती ॥३६॥

प्रवृत्तिः+उत्पन्ना मनसः स्थिति-निबन्धनी+इति+अनुवर्तते । हृदय-पुण्डरीके धारयतो या बुद्धि-संवित्+बुद्धि-सत्त्वं हि भास्वरम्+आकाश-कल्पं, तत्र स्थिति-वैशारद्यात्+प्रवृत्तिः सूर्य+इन्दु-ग्रह-मणि-प्रभारूप+आकारेण विकल्पते । तथा+अस्मितायां समापन्नं चित्तं निस्तरङ्ग-महोदधि-कल्पं शान्तम्+अनन्तम+स्मितामात्रं भवति । यत्र+इदम्+उक्तं—तम्+अणुमात्रम्+आत्मानम्+अनुविद्या+अस्मीत+इति+एवं तावत्+सम्प्रजानीते इति । एषा द्वयी विशोका, विषयवती अस्मितामात्रा च प्रवृत्तिः+ज्योतिष्मति+इति+उच्यन्ते । यया योगिनः+चित्तं स्थितिपदं लभत इति ॥३६॥

वीत-राग-विषयं वा चित्तम् ॥३७॥

वीत-राग-चित्त-आलम्बना+उपरक्तं वा योगिनः+चित्तं स्थितिपदं लभतः+ इति ॥३७॥

स्वप्न-निद्रा-ज्ञान+आलम्बनं वा ॥३८॥

स्वप्न-ज्ञान+आलम्बनं वा निद्रा-ज्ञान+आलम्बनं वा तदाकारं योगिनः+चित्तं स्थितिपदं लभतः+ इति ॥३८॥

यथा+अभिमत-ध्यानात्+वा ॥३९॥
यत्+एवा+अभिमतं तत्+एव ध्यायेत। तत्र लब्ध-स्थितिकम्-अन्यत्रापि स्थिति-पदं लभत इति ॥३९॥

परमाणु-परममहत्त्वान्तः+अस्य वशीकारः ॥४०॥

सूक्ष्मे निर्विशमानस्य परमाण्वन्तं स्थितिपदं लभत इति । स्थूले निर्विशमानस्य परम-महत्त्वान्तं स्थिति-पदं चित्तस्य । एवं तौ+उभयीं कोटिम्-अनुधावतो यः+अस्याप्रतिघातः सः+ परो वशीकारः । तत्+वशीकारात्+परिपूर्णं योगिनः+चित्तं न पुनः+अभ्यास-कृतं परिकर्मापेक्षत इति ॥४०॥
अथ लब्ध-स्थितिकस्य चेतसः किंस्वरूपा किंविषया वा समापत्तिः+इति ? तत्+उच्यते—

क्षीण-वृत्तेः+अभिजातस्य+इव मणेः+र्ग्रहीतृ-ग्रहण-ग्राह्येषु तत्-स्थ-तत्-अञ्जनता समापत्तिः ॥४१॥

क्षीण-वृत्तेः+इति प्रत्यमित-प्रत्ययस्य+इति+अर्थः । अभिजातस्य+इव मणेः+इति दृष्टान्तः+उपादानम् । यथा स्फटिक उपाश्रयभेदात्+तत्+रुप+उपरक्त उपाश्रयरूपाकारेण निर्भासते, तथा ग्राह्य-आलम्बन+उपरक्तं चित्तं ग्राह्य-समापन्नं ग्राह्य-स्वरूपाकारेण निर्भासते । तथा भूत-सूक्ष्मः+उपरक्तं भूत-सूक्ष्म-समापन्नं भूत-सूक्ष्म-स्वरूप-आभासं भवति । तथा विश्व-भेदः+उपरक्तं विश्व-भेद-समापन्नं विश्व-रूप-आभासं भवति । तथा ग्रहणेषु+अपि+इन्द्रियेषु+अपि द्रष्टव्यम् । ग्रहण-आलम्बनः+उपरक्तं ग्रहण-समापन्नं ग्रहण-स्वरूपाकारेण निर्भासते । तथा ग्रहीतृ-पुरुषः+आलम्बनः+उपरक्तं ग्रहीतृ-पुरुष-समापन्नं ग्रहीतृ-पुरुष-स्वरूपाकारेण निर्भासते । तथा मुक्त-पुरुषः+आलम्बनः+उपरक्तं मुक्त-पुरुष-समापन्नं मुक्त-पुरुष-स्वरूपाकारेण निर्भासत इति । तत्+एवम्+अभिजात-मणिकल्पस्य चेतसः+ ग्रहीतृ-ग्रहण-ग्राह्येषु पुरुष-इन्द्रिय-भूतेषु या तत्-स्थ-तत्+अञ्जनता तेषु स्थितस्य तदाकारापत्तिः सा समापत्तिः+इति+उच्यते ॥४१॥

तत्र शब्द-अर्थ-ज्ञान-विकल्पैः संकीर्णा सवितर्का समापत्तिः ॥४२॥

तत्+यथा गौः+इति शब्दः+ गौः+इति+अर्थः+ गौः+इति ज्ञानम्+इति+अविभागेन विभक्तानाम्+अपि ग्रहणं दृष्टम् । विभज्यमानाः+च+अन्ये शब्दधर्मा अन्ये+अर्थधर्मा अन्ये ज्ञान-धर्मा इति+एतेषां विभक्तः पन्थाः । तत्र समापन्नस्य योगिनः+ यः+ गवादि+अर्थः समाधि-प्रज्ञायां समारूढः सः+ चेत्+शब्द-अर्थ-ज्ञान-विकल्प-अनुविद्धः+ उपावर्तते सा संकीर्णा समापत्तिः सवितर्क+इति+उच्यते ॥४२॥

यदा पुनः शब्द-सङ्केत-स्मृति-परिशुद्धौ श्रुत-अनुमान-ज्ञान-विकल्प-शून्यायां समाधि-प्रज्ञायां स्वरूप-मात्रेण+अवस्थितः+अर्थः+तत् स्वरूपाकारमात्रता+एव+अवच्छिद्यते, सा च निर्वितर्का समापत्तिः । तत्परं प्रत्यक्षम् । तत्+च श्रुत-अनुमानयोः+बीजम् । ततः

श्रुत-अनुमाने प्रभवतः । न च श्रुत-अनुमान-ज्ञान-सहभूतं तद्दृष्टान्तम् । तस्मात्+असङ्कीर्णं प्रमाणान्तरेण योगिनोः+ निर्वितर्क-समाधिजं दर्शनम्+इति । निर्वितर्कायाः समापत्तेः+अस्याः सूत्रेण लक्षणं द्योत्यते—

स्मृति-परिशुद्धौ स्वरूप-शून्ये+एव+अर्थ-मात्र-निर्भासा निर्वितर्का ॥४३॥

या शब्दसङ्केत-श्रुत-अनुमान-ज्ञान-विकल्प-स्मृति-परिशुद्धौ ग्राह्य-स्वरूपः+उपरक्ता प्रज्ञा स्वमि+इव प्रज्ञा-स्वरूपं ग्रहणात्मकं त्यक्त्वा पदार्थमात्रस्वरूपा ग्राह्य-स्वरूपापनः+एव भवति, सा तदा निर्वितर्का समापत्तिः । तथा च व्याख्यातम् ।
तस्या एक-बुद्धि-उपक्रमः+ हि+अर्थ-आत्मा-अणु-प्रचय-विशेषात्मा गवादिः+घटादिः+वा लोकः । सः+ च संस्थान-विशेषः+ भूत्सू-क्ष्माणां साधारणः+ धर्मः, आत्मभूतः फलेन व्यक्तेन +अनुमितः स्वव्यञ्जकाञ्जनः प्रादुर्भवति। धर्मान्तरस्य कपालादेरुदये च तिरोभवति। सः+ एषः+ धर्मः+अवयवी+इति+उच्यते। यः+असौ+एकः+च महान्+च+अणीयान्+च स्पर्शवान्+च क्रियाधर्मकः+च+अनित्यः+च तेनावयविना व्यवहाराः क्रियन्ते। यस्य पुनः+अवस्तुकः सः+ प्रचयविशेषः सूक्ष्मं च कारणम्+अनुपलभ्यम्+अविकल्पस्य तस्य+अवयव्यभावात्+अतद्रूपप्रतिष्ठं मिथ्या-ज्ञानम्+इति प्रायेण सर्वमेव प्राप्तं मिथ्या-ज्ञानम्+इति। तदा च सम्यक्+ज्ञानम्+अपि किं स्यात्+विषयाभावात्। यत्+उदुपलभ्यते तत्तद्+अवयवित्वेन+आम्नातम्। तस्मात्+अस्ति+अवयवी यः+ महत्त्वादिव्यवहारापन्नः समापत्तेः+निर्वितर्काया विषयी भवति। शून्येवार्थमात्रनिर्भासा निर्वितर्का ॥४३॥

एतया+एव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥४४॥

तत्र भूत-सूक्ष्मकेषु+अभिव्यक्त-धर्मकेषु देश-काल-निमित्त+अनुभव-अवच्छिन्नेषु या समापत्तिः सा सविचारा+इति+उच्यते। तत्र+अपि+एक-बुद्धि-निर्ग्राह्यम् एव+उदित-धर्म-विशिष्टं भूत-सूक्ष्मम् आलम्बनीभूतं समाधि-प्रज्ञायाम् उपतिष्ठते।
या पुनः सर्वथा सर्वतः शान्तः+उदित-अव्यपदेश्य-धर्म-अनवच्छिन्नेषु सर्व-धर्म-अनुपातिषु सर्व-धर्मात्मकेषु समापत्तिः सा निर्विचारा+इति+उच्यते। एवंस्वरूपं हि

तत्+भूतसूक्ष्मम्+एतेन+एव स्वरूपेणालम्बनीभूतम्+एव समाधि-प्रज्ञास्वरूपम्+उपरञ्जयति। प्रज्ञा च स्वरूप-शून्येव+अर्थमात्रा यदा भवति तदा निर्विचारा+इति+उच्यते। तत्र महत्+वस्तुविषया सवितर्का निर्वितर्का च। सूक्ष्म-वस्तु-विषया सविचारा निर्विचारा च। एवमुभयोः+एतयैव निर्वितर्कया विकल्पहानिर्व्याख्यात+इति।॥४४॥

सूक्ष्म-विषयत्वं च+अलिङ्ग-परि-अवसानम्॥४५॥

पार्थिवस्य+अणोः+गन्ध-तन्मात्रं सूक्ष्मः+ विषयः। आप्यस्य रस-तन्मात्रम्। तैजसस्य रूप-तन्मात्रम्। वायवीयस्य स्पर्श-तन्मात्रम्। आकाशस्य शब्द-तन्मात्रम् इति। तेषाम् अहंकारः। अस्यापि लिङ्ग-मात्रं सूक्ष्मः+ विषयः। लिङ्गमात्रस्य+अपि अलिङ्गं सूक्ष्मः+ विषयः। न चालिङ्गात्+परं सूक्ष्म-मस्ति। ननु+अस्ति पुरुषः सूक्ष्मः+ इति सत्यम्। यथा लिङ्गात् परम-लिङ्गस्य सौक्ष्म्यं न चैवं पुरुषस्य। किंतु, लिङ्गस्य+अन्वयि-कारणं पुरुषः+ न भवति, हेतुः+तु भवति+इति। अतः प्रधाने सौक्ष्म्यं निरतिशयं व्याख्यातम्॥४५॥

ता एव सबीजः समाधिः॥४६॥

ताः+चतस्रः समापत्तयोः+ बहिः+वस्तु-बीजा इति समाधिः+अपि सबीजः। तत्र स्थूले+अर्थे सवितर्कः+ निर्वितर्कः, सूक्ष्मे+अर्थे सविचारः+ निर्विचारः+ इति चतुर्धा+उपसंख्यातः समाधिः+इति।॥४६॥

निर्विचार-वैशारद्ये+अध्यात्म-प्रसादः॥४७॥

अशुद्धि+आवरणमलापेतस्य प्रकाशात्मनः+ बुद्धि-सत्त्वस्य रजः+तमोभ्याम् अनभिभूतः स्वच्छः स्थिति-प्रवाहः+ वैशारद्यम्। यदा निर्विचारस्य समाधेः+वैशारद्यम्+इदं जायते तदा योगिनः+ भवति+आध्यात्म-प्रसादः+ भूतार्थ-विषयः क्रमाननुरोधी स्फुटः प्रज्ञा-लोकः।
तथा चोक्तम् --- "प्रज्ञाप्रसादम् आरुह्य अशोच्यः शोचतो जनान् /
भूमिष्ठान् इव शैलस्थः सर्वान् प्राज्ञः+अनुपश्यति"।॥४७॥

ऋतम्भरा तत्र प्रज्ञा ॥४८॥

तस्मिन्+समाहित-चित्तस्य या प्रज्ञा जायते, तस्या ऋतम्भरा+इति संज्ञा भवति । अन्वर्था च सा, सत्यमेव बिभर्ति । न च तत्र विपर्यास-ज्ञान-गन्धः+अपि+अस्ति+इति । तथा च+उक्तं— आगमेन+अनुमानेन ध्यान-अभ्यास-रसेन च ।
त्रिधा प्रकल्पयन्-प्रज्ञां लभते योगम्+उत्तमम् ॥ इति ॥ ४८॥
सा पुनः—

श्रुत-अनुमान-प्रज्ञाभ्याम्+अन्य-विषया विशेषार्थत्वात्॥४९॥

श्रुत-आगम-विज्ञानं तत्-सामान्य-विषयम् । न हि+आगमेन शक्यः+ विशेषः+अभिधातुम् । कस्मात्? न हि विशेषेण कृत-सङ्केतः शब्दः+ इति । तथा+अनुमानं सामान्य-विषयमेव । यत्र प्राप्तिः+तत्र गतिः, यत्र न प्राप्तिः+तत्र न गतिःइति+उक्तम् । अनुमानेन च सामान्यनः+उपसंहारः । तस्मात्+श्रुत-अनुमान-विषयः+ न विशेषः कश्चित्+अस्ति+इति । न च+अस्य सूक्ष्म-व्यवहित-विप्रकृष्टस्य वस्तुनः+ लोक-प्रत्यक्षेण ग्रहणमस्ति । न च+अस्य विशेषस्य+अप्रमाणकस्य+अभावः+अस्ति+इति समाधि-प्रज्ञानिर्ग्राह्य ग्रहणमस्ति । न च+अस्य विशेषस्य+अप्रमाणकस्य+अभावः+अस्ति+इति समाधि-प्रज्ञानिर्ग्राह्य एव सः+ विशेषः भवति । भूत-सूक्ष्मगतः+ वा पुरुषगतः+ वा । तस्मात्+श्रुत-अनुमान-प्रज्ञाभ्याम्+अन्य-विषया सा प्रज्ञा विशेषार्थत्वात्+इति ॥४९॥

तत्+जः संस्कारः+अन्य-संस्कार-प्रतिबन्धी ॥५०॥

समाधि-प्रज्ञा-प्रभवः संस्कारः+ व्युत्थान-संस्कार-आशयं बाधते । व्युत्थान-संस्कार-अभिभवात्+तत्+प्रभवाः प्रत्यया न भवन्ति । प्रत्यय-निरोधे समाधिः+उपतिष्ठते । ततः समाधिजा प्रज्ञा, ततः प्रज्ञाकृताः संस्कारा इति नवो नवः संस्कार-आशयः+ जायते । ततः+च प्रज्ञा ततः+च संस्काराः इति । कथम्+असौ संस्कार-आतिशयः+चित्तं साधिकारं न करिष्यति+इति ? न ते प्रज्ञा-कृताः संस्काराः क्लेश-क्षय-हेतुत्वात्+चित्तम्+अधिकार-विशिष्टं कुर्वन्ति । चित्तं हि ते स्वकार्यात्+अवसादयन्ति । ख्याति-पर्यवसानं हि चित्त-चेष्टितम्+इति ॥५०॥
किं चास्य भवति ?

तस्य+अपि निरोधे सर्व-निरोधात्+निर्बीजः समाधिः ॥५१॥

इति पतञ्जलि-विरचिते योगसूत्रे प्रथमः समाधिपादः ।

सः+ न केवलं समाधि-प्रज्ञा-विरोधी । प्रज्ञा-कृतानाम्-अपि संस्काराणां प्रतिबन्धी भवति । कस्मात्? निरोधजः संस्कारः समाधिजान्-संस्कारान्-बाधतः+ इति । निरोध-स्थिति-काल-क्रम-अनुभवेन निरोध-चित्त-कृत-संस्कार-अस्तित्वम्-अनुमेयम् । व्युत्थान-निरोध-समाधि-प्रभवैः सह कैवल्य-भागीयैः संस्कारैः+चित्तं स्वस्यां प्रकृतौ+अवस्थितायां प्रविलीयते । तस्मात्+ते संस्काराः+चित्तस्य+अधिकार-विरोधिनः+ न स्थिति-हेतवो भवन्ति+इति । यस्मात्+अवसिताधिकारं सह कैवल्य-भागीयैः संस्कारैः+चित्तं निवर्तते । तस्मिन्-निवृत्ते पुरुषः स्वरूप-मात्र-प्रतिष्ठः+अतः शुद्धः केवलः+ मुक्तः+ इति+उच्यते इति ॥५१॥

इति श्रीपातञ्जले साङ्ख्य-प्रवचने योग-शास्त्रे श्रीमतद्-व्यास-भाष्ये समाधि-पादः प्रथमः ।